कारुण्यं परमो धर्मः ॥

कारुण्यशालिनं श्रेति लक्ष्मि॥

Code no: 11 (HS)

आषाढमासस्य किमपि सायाह्नम्। आकाशं सर्वतः कालवर्णमेघाः भीकराकारं धारयन्तः सञ्चरन्ति। सागरतरङ्गाः अट्टहासं कुर्वन्तः तीरे शक्त्या घट्टयन्ति। सागर-पक्षिणः भीताः आक्रन्दनं कुर्वन्तः डयन्ते। झटिति आकाशः दुन्दुभिनादेन वर्षसूचनां ददाति। प्रकृतेः इदं भीकरदृश्यं पश्यन्तः जनाः स्वगृहेषु शरणं प्राप्नुवन्ति।

सतीशः सागरतीरे एकाकी उपविशन् आसीत्। अरोगदृढगात्रः सद्गुणसम्पन्नश्च कश्चित् युवकः सः। प्रकृतेः विकारः सतीशस्य मनसि परिभ्रमं न अजनयत्। तस्य मनसि विविधविकारविचाराः तरङ्गरूपेण आन्दोलयन्तः आसन्। दुःखनिमग्नं तस्य मनः। किं एतादृश्याः अवस्थायाः कारणं? अस्ति एका कथनकथा।

सतीशस्य परिवारः निर्धनः आसीत्। पिता, माता, सहोदरी, सतीशश्चेति चत्वारः जनाः तत्र आसन्। पिता कस्मिंश्चित् यन्त्रागारे कर्मकरः आसीत्। अतीव-स्नेहेन सः कुटुम्बं पालयति स्म। पुत्रः सतीशः पुत्री सुमिता च पठने समर्थौ आस्ताम्। स्पर्धाबुद्ध्या द्वावपि पठतः स्म। सतीशः न केवलं पठने अपि तु कलाकायिकक्षेत्रेषु अपि निपुणः अभवत्। अतीव प्रयत्नशीलः एवासीत् सः। एवं सतीशः विद्यालयस्य देशस्य च प्रशंसापात्रमभवत्।

अहो कष्टम्! तस्य कुटुम्बस्य सकलसुखसौभाग्यानि अकस्मादेव समाप्तानि। एकदा यन्त्रागारात् प्रत्यागमनसमये पिता कस्मिंश्चित् वाहनापघाते दिवंगतः। तत् दिनं विद्यालयस्य देशस्य च दुःखदिनं आसीत्। पितुः मरणेन गृहस्य आश्रयः एव नष्टः। तान् समाश्वासयितुं बहवः आगताः। किन्तु सर्वेषां प्रयत्नः निष्फलः अभवत्।

माता सन्तानयोः भविष्यं चिन्तयन्ती दुःखाकुला अभवत्। छात्राणां पठनं, कुटुम्बस्य व्ययः च कथं करणीयमिति सा चिन्तयितुं आरब्धवती। गृहे केचन केरवृक्षाः आसन्। तद्द्वारा किञ्चित् धनं लभते। किन्तु नारिकेलस्य मूल्यच्युतिः अभवत्। इत्यतः तत्र अधिकः लाभः नाभवत्। अतः सा अन्यगृहेषु कर्म कर्तुम् अगच्छत्।

सतीशस्य अधुना वयः अष्टादश। अभव कलालयपठनं समाप्य सः समीपस्थान् छात्रान् आङ्गलं ,गणि च पाठयितुं आरभत। एवं मातुः सहाय्यं सः करोति स्म। कदचित् सतीशस्य मित्रं पवित्रः सहाय्यं करोति। सः अधुना धनिकः वर्तते। पठनकार्येषु सः यावच्छक्यं सहाय्यं अकरोत्।

एवं प्रकारेण सतीशस्य जीवितं अग्रे अगच्छत्। किन्तु निरन्तरेण अमितप्रयत्नेन तस्य माता शय्यावलंबिनी जाता। अतः तस्य जीवितं पुनरपि क्लेशकरं अभवत्। तन्मध्ये सः आङ्गलसाहित्ये बि.ए सम्पादितवान्। इदानीं तस्य सहोदर्याः विवाहप्रायः अस्ति। यद्यपि सा सुन्दरी सुशीला च वर्तते तथापि धनस्य अभावेन विवाहः सम्भवं नाभवत्। मनोदुःखाय अधिकं किं आवश्यकम्?

एतादृशे जीवितक्लेशे अपि सतीशः कठिनप्रयत्नेन बि.ए बिरुदं ~~अविन्दत~~ अविन्दत। किन्तु अधुना तेन किं प्रयोजनं? सर्वकारेण अध्यापकनियुक्तिः निरुद्धा आसीत्। सर्वगुणसम्पन्नाः निर्धनाः क्लेशं अनुभवन्ति। निर्गुणाः सम्पन्नाः सुखेन जीवन्ति च। दुःखितः सतीशः अचिन्तयत्- "अहं भाग्यहीनः अस्मि। अहं जीवने निरन्तरं परिश्रमं अकरोत्। किन्तु मम जीवनाभिलाषं साक्षात्कर्तुं अहं शक्तो नास्मि। किं करणीयम्।'

समयं अतिक्रम्य सूर्यः चरमगिरिं प्राप्तवान्। घोरान्धकारं धरण्यां प्रसरति स्म। झटिति सतीशस्य स्कन्धे कोऽपि स्पृष्टवान्। तस्य मित्रं पवित्रः एवासीत् सः। सः अधुना विदेशे कार्यं करोति स्म। विरामं स्वीकृत्य गृहं आगतः। ~~मि~~ मित्रस्य कुटुम्बस्थितिं ज्ञात्वा आगतः वर्तते। सतीशं सहाय्यं कर्तुं सः ऐच्छत्। तस्य पितुः विद्यालये आङ्गलाध्यापकस्य पदवी रिक्ता आसीत्। तत् स्थाने सतीशं प्रेषयितुं सः दृष्टवान्। सतीशस्य नेत्राभ्यां आनन्दाश्रूणि आगतानि। पवित्रः अवदत् -

'मित्रं सतीश, कारुण्यं परमो धर्मः। लक्ष्मीदेवि भवन्तं परिपालयिष्यति।' इति।

अनन्तरं पवित्रः तेन साकं तस्य गृहमगच्छत्। तस्य मातुः समीपं गत्वा सः समाश्वासयत्। अनन्तरं सः अवदत् - मित्रं सतीश, अहं जानामि यत् मम मित्रस्य सहोदरी

ममापि सहोदरी इति। किन्तु भवतां दुःस्थितिं ज्ञात्वा अहं एवं निवेदयामि यत् सहोदर्याः विवाहं कर्तुं इच्छामि इति। आनन्दाधिक्येन सतीशः पवित्रं आलिङ्गितवान्। एवं सुमिता पवित्रस्य पत्नी अभवत्। पुनरपि सतीशस्य जीवने वसन्तकालः समागतः। मन्दं मन्दं सः क्लेशेभ्यः मुक्तिं प्राप्तवान्। अतः एव उच्यते -

कारुण्यं परमो धर्मः। इति॥

— शुभम् —